# Shri Shiva Stotram

# શ્રીશિવસ્તોત્રમ્ ૧૦

## Document Information

Text title : Shri Shiva Stotram 02 03

File name : shivastotram10.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-03

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીશિવસ્તોત્રમ્ ૧૦

જય જય શમ્ભો ગિરિજાબન્ધો શિવ શિવ શઙ્કર ભૂતપતે ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧॥

શિવ સુરનાયક મઙ્ગલવિગ્રહ કુરુ કુરુ મઙ્ગલમાશુ વિભો ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૨॥

શરણં યામશ્ચરણદ્વન્દ્વં તવ (પદ) યત્ કમલાપતિમૃગ્યં (વેલમ્) ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૩॥

તવ પદકમલાદમલાદન્યચ્ચિન્તિતમપિ ન હિ ચેતસિ (શં)ભો ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૪॥

નામૈવોત્તમ તવ પદમમલં મઙ્ગલદાયકમઙ્ગલદમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૫॥

શિવ વયમશિવં ન ભજામસ્ત્વયિ સતિ સશિવે શિવમૂર્તૌ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૬॥

ભગવન્ ભવતા ભવતાપહૃતા ન હૃતં દુરિતં કિં નુ કૃતમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૭॥

સકૃદપિ તવ હર નામસ્મરણં કૃતમઘકુલહરમતિશુભદમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૮॥

સ્મૃતમપિ તવ હર ચરણદ્વન્દ્વં હરતિ વિષાદં કિમુ દુષ્ટમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૯॥

હર યદ્યસ્મત્કૃતમપરાધં વિવિધં કૃપયા હરસિ તથા ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૦॥

સુતમપરાધિનમપિ કૃતશિક્ષ જનકઃ પાલયતીશ યથા ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૧॥

ભવતા સૃષ્ટં જગદિવ સૃષ્ટાનસ્માનયિ ભવ પાલય નિત્યમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૨॥

જગતામેકો જનકસ્ત્વમતો વયમપિ જગતો ન હિ ભિન્નાઃ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૩॥

ન હિ જાનીમો ભવદન્યં શઙ્કર ધીરં પાતારમ્ ।
ગિરિશ મહાપજલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૪॥

દેવ ગજાસુરપરિહૃતવિભવાનસ્માન્ (ભયદ) સભવાનવ સદય ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૫॥

શરણં ભવ ભવ શરણં ભવ ભવ ભવ શરણં ત્વં કરુણાબ્ધે ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૬॥

ન સુતા વયમપિ તવ કિમુ શમ્ભો જનકો ન ભવાનસ્માકમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૭॥

ભવતા સૃષ્ટાઃ સકલા લોકા વયમપિ તદ્વદ્ધર સૃષ્ટાઃ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૮॥

ભવ ભવદન્યં ન વયં યામઃ સકૃદપિ શરણં મરણે વા ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૧૯॥

નિરવધિકરુણાપારાવારસ્ત્વમતો હર હર ભવદુઃખમ્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૨૦॥

ભવ ભવદીયાનસ્માનનિશં કુરુ ગતદુઃખાનતિદુઃખાન્ ।
ગિરિશ મહાપજ્જલધેરસ્માનુદ્ધર ધીર કૃપાજલધે ॥ ૨૧॥

॥ ઇતિ શ્રીશિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shiva Stotram*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*